हैमप्रभा- अङ्क : २०, २०७८ पृ. ४६-५८ ISSN : 2392-4764 (P)

# प्रमास्वरूपं तद्भेदाश्च

पुरुषोत्तम आचार्यः
उपप्राध्यापकः, न्यायविभागः
नेसंवि, जनताविद्यापीठम्, दाङः, नेपालः
Email : pyarapuru@gmail.com

*(**सारसङ्क्षेप :** प्रस्तुतोऽयमालेखः पौरस्त्यदर्शनेषु प्रामुख्यं भजमानस्य न्यायदर्शनस्य वैशेषिकदर्शनस्य च प्रमाविवेचने केन्द्रितो वर्तते । आलेखेऽस्मिन् न्यायवैशेषिकदर्शनाभिमतायाः प्रमायाः स्वरूपं तद्भेदाश्च निरूपिताः । प्रमायाः भेदनिरूपणक्रमे न्यायदृष्टचा प्रत्यक्षानुमित्युपमितिशाब्दादिचतुर्विध-प्रमाणां वैशेषिकदृष्टचा हि प्रत्यक्षानुमितिभेदेन प्रमाद्वयस्य च वस्तुतत्त्वान्वेषणे प्रयासो विहितोऽत्रालेखे । प्रत्यक्षादिप्रमाया यथार्थस्वरूपं विविच्य तद्वति (रजतत्ववति रजते) तत्प्रकारकानुभवः (रजतत्वप्रकारकानुभवः) एव प्रमा, अर्थात् प्रमाज्ञानमिति प्रतिपादयन् निकृष्टलक्षणत्वेन तद्वन्निष्ठविशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वे सत्यनुभवत्वं यथार्थानुभवस्य लक्षणमिति निष्कर्षः प्रस्तुतो विद्यतेऽत्रालेखे । किञ्च वैशेषिकदर्शनदृष्टचा उपमितिप्रमायाः शाब्दप्रमायाश्चानुमान एवान्तर्भाव इत्यपि विषयोऽत्र प्रस्तुतो विद्यते । अस्मान्निष्कर्षान्न्यायवैशेषिकशास्त्रजिज्ञासूनां कृते तदभिमतप्रमाविषयस्य निकृष्टतया स्वरूपज्ञानार्थमुपयोगित्वं भविष्यतीत्यपेक्षते ।)*

***शब्दकुञ्जी -*** *प्रमा, प्रत्यक्षम्, अनुमितिः, उपमितिः, शाब्दः ।*

## १. विषयपरिचयः

जगत्यस्मिन् सन्ति बहूनि दर्शनानि । तन्मध्ये न्यायवैशेषिकयोः स्थानं विशिष्टं वर्तते । न्यायशास्त्रं हि महर्षिगौतमप्रणीतञ्चेद् वैशेषिकशास्त्रं महर्षिकणादप्रणीतमिति । न्यायवैशेषिकदर्शनसम्बद्धप्रमाविषयकचिन्तने सन्ति नैकविधाः समस्याः । तादृशसमस्यानां निराकरणायैव शोधलेखनेऽस्मिन् प्रवृत्तिः । ज्ञानं हि द्विविधं स्मृत्यनुभवभेदेन । तत्र अनुभवस्य यथार्थायथार्थत्वेन भेदद्वयमित्यपि ज्ञेयम् । ज्ञानम्, बुद्धिः, उपलब्धिश्चैते शब्दाः समानार्थका इति न्यायसूत्रकारस्य गौतमस्योद्घोषः । अनेन यथार्थज्ञानम्, यथार्थबुद्धिः, यथार्थोपलब्धिर्वा प्रमेति स्पष्टीभवति । सा च प्रमा तद्वति तत्प्रकारकानुभवरूपेति बहुशः प्रतिपादिता न्यायवैशेषिकशास्त्रे । अत एव न्याये वैशेषिके च प्रमायाः स्वरूपं कथं विवृतम् ? तद्भेदाश्च कथं प्रतिपादिताः ? प्रत्यक्षानुमित्युपमितिशाब्दाश्च किंस्वरूपाः ? इत्यादिसमस्यानां खलु समाधानाय प्रयत्नो विहितोऽत्रालेखे । न्यायाभिमतानां प्रत्यक्षानुमानोपमानशब्दादिप्रमाणानां कार्यजातानि प्रत्यक्षानुमित्युपमिति शाब्दात्मकज्ञानान्यथ च वैशेषिकाभिमतयोः प्रत्यक्षानुमानप्रमाणयोः कार्यभूतं प्रत्यक्षमनुमितिञ्च विश्लिष्य

वैशेषिकदर्शनदिशोपमितेः शाब्दस्य चानुमान एवान्तर्भावो भवतीति रीत्या निष्कर्षः प्रस्तुतो वर्तते । इदानीमत्रालेखे न्यायवैशेषिकदर्शनाभितायाः प्रमायाः स्वरूपप्रदर्शनपुरस्सरं तद्भेदाश्च विमृश्यन्ते ।

## २. अध्ययनविधिः

प्रस्तुतमिदमनुसन्धानं मुख्यतया पुस्तकालयीयविधिमङ्गीकृत्य विहितम् । अत्र न्यायवैशेषिकदर्शनसम्बद्धेभ्यः संस्कृतमूलाकरग्रन्थेभ्यः, एतद्विषयसम्बद्धेभ्यो ग्रन्थान्तरेभ्यश्च सामग्रीः सङ्कलय्य तासां सामग्रीणामुत प्रमाविषयकचिन्तनानां विश्लेषणं च कृत्वा निष्कर्षः प्रस्तुतो वर्तते ।

## ३. अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च

न्यायवैशेषिकदर्शनसम्बद्धप्रमास्वरूपस्य तद्भेदानां चाध्ययनमेवास्यानुसन्धानात्मकस्यालेखस्य मुख्यं क्षेत्रमस्ति । न्यायवैशेषिकाचार्यैः न्यायभाष्य-प्रशस्तपादभाष्य-न्यायसिद्धान्तमुक्तावल्यादिग्रन्थेषु कृतस्य प्रमालक्षणस्य, तद्भेदानां (प्रत्यक्ष-अनुमिति-उपमिति-शाब्दानाम्) च विवेचनमाहोस्विद् विश्लेषणमेवास्य खल्वनुसन्धानात्मकालेखस्य मूलं क्षेत्रं सीमा च वर्तते ।

## ४. सैद्धान्तिकाधारः

आलेखेऽस्मिन् न्यायवैशेषिकदर्शनसम्बद्धग्रन्थानुसारं प्रमाविषयकचिन्तनं विश्लेषितं वर्तते । न्यायवैशेषिकगतसंस्कृतमूलाकरा ग्रन्थाः, एतद्विषयसम्बद्धा व्याख्यानात्मका ग्रन्थाश्च प्रस्तुतस्यानुसन्धानात्मकालेखस्य सैद्धान्तिकाधारत्वेन परिगणिता विद्यन्ते । विशेषतोऽस्मिन् अनुसन्धानात्मकालेखे न्यायसूत्रम्, न्यायभाष्यम्, न्यायवार्तिकम्, न्यायवार्तिकतात्पर्यटीका, न्यायकुसुमाञ्जलिः, वैशेषिकसूत्रम्, प्रशस्तपादभाष्यम्, वैशेषिकसूत्रोपस्कारः, कारिकावली, न्यायसिद्धान्तमुक्तावली, तर्कभाषा, तर्कसङ्ग्रहश्चेत्यादिग्रन्थाः सैद्धान्तिकाधारत्वेनाङ्गीकृताः । एतादृशसैद्धान्तिकाधारे प्रमास्वरूपं तद्भेदाञ्च विविच्य निष्कर्षः प्रस्तुतो विद्यते । अस्यानुसन्धानात्मकालेखस्य व्यवस्थितरूपेण स्वरूपनिर्माणप्रसङ्गे प्रचलितायाः (एपीए) पद्धतेरवलम्बनं कृतं वर्तते ।

## ५. विश्लेषणप्रक्रिया

प्रमास्वरूपं तद्भेदाश्चेति शीर्षके केन्द्रीभूयास्यानुसन्धानात्मकालेखस्य व्यवस्थितरूपेण परिसमाप्त्यर्थं सर्वप्रथमन्तावद् न्यायवैशेषिकदर्शनसम्बद्धग्रन्थानां चयनं कृतम् । तत्र प्रमाविषयकचिन्तनक्रमे हि न्यायवैशेषिकाचार्यैः स्वीकृतप्रमास्वरूपं प्रदर्श्य प्रत्यक्षानुमित्युपमितिशाब्दरूपप्रमाभेदस्य च विश्लेषणं विहितं वर्तते ।

## ६. प्रमास्वरूपम्

का नाम प्रमा ? किन्तत्स्वरूपम् ? इत्यत्र न्यायवैशेषिकाचार्यैः प्रतिपादितप्रमायाः तत्स्वरूपस्य च विवेचनं प्रस्तुतं वर्ततेऽत्र । सर्वप्रथमन्तावत् प्रमास्वरूपज्ञानात्पूर्वं ज्ञानस्य भेदोऽवगन्तव्यो भवति । ज्ञानं हि द्विविधं स्मृत्यनुभवभेदेनेति । स्मृतिर्नाम संस्कारमात्रजन्यत्वे सति ज्ञानत्वमिति । तद्भिन्नं ज्ञानमनुभव इति । तादृशानुभवस्यापि यथार्थायथार्थभेदेन द्वैविध्यमित्यपि ज्ञेयम् । तयोर्मध्ये यथार्थानुभवो यः, सैव प्रमेत्युच्यते । तत्र कैश्चिदाचार्यैः साक्षात्प्रमाया लक्षणं विहितञ्चेत् कैश्चिदाचार्यैः प्रमाणलक्षणगतप्रमाज्ञापकपदेन तल्लक्षणं

विहितं वर्तते । तच्च यथाक्रमं प्रस्तूयते-

महर्षिणा गौतमेन न्यायसूत्रे साक्षात् प्रमालक्षणं नोक्तम्। तथापि "प्रमाणप्रमेयसंशयप्रयोजनसिद्धान्तावयव-तर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानाद् निःश्रेयसाधिगमः" (न्यायसूत्रम्, १-१-१) इति प्रथमसूत्रे तत्त्वज्ञानस्य निःश्रेयसोपायत्वं प्रदर्श्य "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" (न्यायसूत्रम्,१-१-२) इति द्वितीयसूत्रे तत्त्वज्ञानस्य मिथ्याज्ञाननिवर्तकत्वप्रतिपादनेन किल तत्त्वज्ञानं प्रमेति सूत्रकाराशयः ज्ञापितो भवति । तथा च मिथ्याज्ञानं भ्रमः । तादृशमिथ्याज्ञाननिवर्तकञ्च ज्ञानं प्रमेति व्यवहरन् सूत्रकारः प्रमास्वरूपं स्वीकरोति । न्यायभाष्ये वात्स्यायनेन प्रमास्वरूपं प्रदर्शयितुम् "उपलब्धिसाधनानि प्रमाणानीति समाख्यानिर्वचनसामर्थ्याद् बोद्धव्यम्" (वात्स्यायनः, सन् १९९८, १८) इत्युच्यते। उपलब्धेर्यत् साधनं तत् प्रमाणं भवतीत्यनेन वात्स्यायनवाक्येन उपलब्धिरेव प्रमा भवतीत्यवगम्यते। "बुद्धिरूपलब्धिर्ज्ञानमित्यनर्थान्तरम्" (न्यायसूत्रम्, १-१-१५) इत्यनेन न्यायसूत्रेणोपलब्धिपदं ज्ञानार्थपरकमिति लभ्यते । निर्विषयकज्ञानस्यासम्भवादर्थविषयकज्ञानत्वमेव प्रमात्वमिति लक्षणं लभ्यते । अत एव न्यायभाष्ये वात्स्यायनेन प्रमाणादिभिर्जन्यं यदात्मसमवेतं यथार्थज्ञानमेव प्रमितिरित्युक्तम् । तदुक्तञ्च "यदर्थविज्ञानं सा प्रमितिः" (वात्स्यायनः, सन् १९९८, ३) इति ।

न्यायवार्तिके उद्योतकरेणापि "उपलब्धिहेतुः प्रमाणम्, उपलब्धिहेतुत्वं प्रमाणत्वम्, यदुपलब्धिनिमित्तं तत् प्रमाणम्" (उद्योतकरः, सन् २००७, ५) इत्यर्थविषयकज्ञानत्वमेव प्रमात्वमुत, उपलब्धिरेव प्रमेत्येवं प्रमास्वरूपमभीष्टम् । वाचस्पतिमिश्रस्तु न्यायवार्तिकतात्पर्यटीकायां "प्रमासाधनं हि प्रमाणम् । न च स्मृतिः प्रमा। लोकाधीनावधारणो हि शब्दार्थसम्बन्धः। लोकश्च संस्कारमात्रजन्मनः स्मृतेरन्यामुपलब्धिमर्थाव्यभिचारिणीं प्रमामाचष्ट" (मिश्रः, सन् २०१३, २१) इत्येवंरीत्या प्रमां निरूपयति । तात्पर्यटीकाकारस्याशयस्त्वेवं वर्तते-यद्यर्थविषयकज्ञानत्वमुत उपलब्धिहेतुत्वमेव प्रमात्वमुच्यते, तर्हि स्मृतिरूपोपलब्धिहेतोः संस्कारस्यापि प्रामाण्यापत्तिः अर्थात् संस्कारस्यापि प्रमात्वं स्यान्नाम । एतादृशदोषनिवारणाय वाचस्पतिमिश्रेण प्रमायाः साधनं प्रमाणमित्यभिमतम् । सा च प्रमा अर्थाव्यभिचारिस्मृतिभिन्नज्ञानरूपेति । ज्ञानस्यार्थाव्यभिचारित्वन्नाम यथावस्थितार्थविषयकत्वम् । एतावता यथावस्थितार्थविषयकत्वे सति ज्ञानत्वं प्रमाया लक्षणमिति सिद्ध्यति ।

जरन्नैयायिकेन जयन्तभट्टेन न्यायमञ्जर्यां "कर्तृकर्मविलक्षणा संशय-विपर्यय-रहितार्थावबोधविधायिनी बोधाबोधस्वभावा सामग्री प्रमाणम्" (भट्टः, सन् १९८४, २३) इति प्रमाणलक्षणं कृतम् । एतेन संशयभिन्नो विपर्ययभिन्नश्च योऽर्थबोधः, सा प्रमेत्यवगम्यते । अत्र संशयविपर्ययभिन्नत्वे सति अर्थविषयकज्ञानत्वस्य तर्के विद्यमानत्वादतिव्याप्तिः । एवमेव स्मृतावपि उक्तलक्षणस्य गमनादतिव्याप्तिः दुर्वारैवातस्तद्वारणाय जयन्तेन अव्यभिचारिणीम्, असन्दिग्धाम्, अर्थोपलब्धिञ्च विदधती बोधाबोधस्वभावा सामग्री प्रमाणमित्यपि प्रतिपादितम् । एतेन अव्यभिचारिणी संशयभिन्ना चार्थोपलब्धिरेव प्रमेति ज्ञातं भवति । उदयनाचार्येण "यथार्थानुभवो मानमनपेक्षतयेष्यते" (न्यायकुसुमाञ्जलिः, ४-१) इत्यनया कारिकया प्रमा निरूपिता वर्तते । अनेन खलु यथार्थानुभवत्वं प्रमात्वमिति सिद्ध्यति । किञ्च "मितिः सम्यक्परिच्छित्तिस्तद्वत्ता च प्रमातृता"

ISSN : 2392-4764 (P)

(न्यायकुसुमाञ्जलिः, ४-५) इत्यनया कारिकया सम्यगनुभवत्वमेव प्रमात्वमिति स्पष्टीभवति ।

वैशेषिकदर्शने विद्यैव प्रमात्मकं ज्ञानमिति प्रतिपादितम् । तदुक्तञ्च कणादेन "अदुष्टं विद्या" (वैशेषिकसूत्रम्, ९-२-१२) । दोषरहितं ज्ञानमेव विद्या (प्रमा) भवतीत्यर्थः । अस्यैव सूत्रस्यार्थं प्रतिपादयन् शंकरमिश्रो वैशेषिकसूत्रोपस्कारे भणति यत्- "अदुष्टमदुष्टेन्द्रियजन्यं यत्र यदस्ति तत्र तदनुभवो वा समानाधिकरणप्रकारानुभवो वा विशेष्यावृत्त्यप्रकारकानुभवो वा विद्येत्यर्थः" (मिश्रः, सन् १९६९, ५१८) इति । अनेन व्याख्यानेन दोषरहितं यद् दोषरहितेन्द्रियजन्यज्ञानमेव विद्याया उत प्रमाया लक्षणमित्यर्थोऽवबोध्यते ।

विश्वनाथेन प्रमाया लक्षणद्वयं प्रस्तुतं विद्यते । तत्र "...... भ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा" (भट्टाचार्यः, सन् २००३ : कारिका-१३४) इत्येकं लक्षणम् । भ्रमभिन्नं यज्ज्ञानं तदेव प्रमेत्युच्यते चेत् शुक्तिरजतयोः 'इमे रजते' इत्याकारके समूहालम्बनज्ञाने शुक्त्यंशे प्रमात्वाभावेऽपि रजतांशेऽपि प्रमात्वाभावापत्तिः स्यादेव, अर्थात् तादृशसमूहालम्बनज्ञानघटकरजतांशे प्रमात्वेन प्रतीतिर्न स्यादतो द्वितीयलक्षणं प्रस्तुतम् । तदुक्तञ्च - "अथ वा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम्, तत्प्रमा" (भट्टाचार्यः, सन् २००३, कारिका-१३५) इति ह्यपरलक्षणम् । तथा च तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वे सति ज्ञानत्वं प्रमाया लक्षणमिति फलितम् । शुक्तिरजतयोः 'इमे रजते' इत्याकारके समूहालम्बनज्ञाने शुक्तित्ववच्छुक्तिविशेष्यकशुक्तित्वप्रकारकज्ञानाभावेऽपि रजतत्ववद्रजतविशेष्यकरजतत्वप्रकारकज्ञानस्य विद्यमानत्वाद् लक्षणसमन्वयः ।

एवञ्च "तद्वति तत्प्रकारकोऽनुभवो यथार्थः । सैव प्रमेत्युच्यते । यथा - रजते इदं रजतमिति ज्ञानम्" (भट्टः, सन् २०१७, १२४) इत्येवंप्रकारेणान्नम्भट्टेन प्रमा निरूपिता । तर्कभाषाकारोऽपि "यथार्थानुभवः प्रमा" (मिश्रः, सन् २००३, १६) इत्येवंरीत्या प्रमां निरूपितवान् । साकल्येनेदं वक्तुं शक्यते यत्- रजतं दृष्ट्वा इदं रजतमिति ज्ञानम्, अर्थात् रजतत्ववति रजते रजतत्वप्रकारकानुभवः प्रमा भवतीति ।

अत्रेदं ज्ञेयम्- वस्तुतस्तु तद्वन्निष्ठविशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वे सत्यनुभवत्वं यथार्थानुभवस्य लक्षणमिति हि निकृष्टलक्षणं बोध्यम् । 'रजते इदं रजतम्' इत्यत्र लक्षणसमन्वयश्चेत्थं प्रदर्श्यते- तद्वति=रजतत्ववति रजते, तत्प्रकारकः=रजतत्वप्रकारकः, योऽनुभवः, स यथार्थ इति । अत्र तत्पदेन प्रकारीभूतो धर्मो ग्राह्यः । एवञ्च तत् रजतत्वम्, तद्वत् रजतम् । तथा च रजतत्ववद्रजतनिष्ठविशेष्यतानिरूपकत्वे सति रजतत्वनिष्ठप्रकारतानिरूपकत्वे सत्यनुभवत्वं 'रजते इदं रजतम्' इत्याकारकज्ञाने वर्तत इति लक्षणसमन्वयः । अत्र तद्वन्निष्ठविशेष्यतानिरूपकत्वे सतीति पदं न निवेश्यते चेत् 'शुक्तौ इदं रजतम्' इत्याकारके भ्रमात्मके ज्ञाने रजतत्वनिष्ठप्रकारतानिरूपकत्वे सत्यनुभवत्वस्य विद्यमानत्वादतिव्याप्तिः । अतस्तद्वारणाय प्रथमदलं देयम् । तथा च 'शुक्तौ इदं रजतम्' इत्याकारके भ्रमात्मके ज्ञाने रजतत्ववद्रजतनिष्ठविशेष्यतानिरूपकत्वाभावेन नातिव्याप्तिः ।

अत्र हि रजतत्वाभाववच्छुक्तिनिष्ठविशेष्यतानिरूपकत्वं वर्तते, न तु रजतत्ववद्रजतनिष्ठविशेष्यता । एवञ्च द्वितीयदलाभावे 'शुक्तौ इदं रजतम्' इत्याकारके भ्रमात्मके ज्ञान एव शुक्तित्ववच्छुक्तिविशेष्यकत्वसत्त्वात्,

एवमेवानुभवत्वस्यापि विद्यमानत्वादतिव्याप्तिः । तद्वारणाय तन्निष्ठप्रकारतानिरूपकत्वे सतीति द्वितीयदलमपि निवेश्यम् । तथा च 'शुक्तौ इदं रजतम्' इत्याकारके भ्रमात्मके ज्ञाने शुक्तित्ववति शुक्तौ रजतत्वनिष्ठप्रकारतानिरूपकत्वसत्त्वेन शुक्तित्वनिष्ठप्रकारतानिरूपकत्वाभावेन नातिव्याप्तिः । एवमेव लक्षणघटकानुभवत्वमात्रोक्तौ 'शुक्तौ इदं रजतम्' इत्याकारकायथार्थानुभव एवातिव्याप्तिर्दुर्वारैव । अतस्तद्वारणाय प्रथमदलं लक्षणे निवेशनीयमित्यपि ज्ञेयम् ।

नन्वेवं सत्यपि 'रङ्गरजतयोरिमे रजतरङ्गे' इत्याकारके समूहालम्बनात्मके भ्रमज्ञाने रङ्गत्ववद्-रङ्गस्य रजतत्ववद्रजतस्य चोभयोर्विशेष्यत्वेन रङ्गत्वरजतत्वयोः खलु प्रकारत्वेन चातिव्याप्तिर्दुर्वारा । तादृशदोषवारणाय तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्वे सत्यनुभवत्वमिति हि वक्तव्यं भवति । तथा चात्र रङ्गनिष्ठविशेष्यतानिरूपिता रङ्गत्वनिष्ठप्रकारता न भवति, किन्तु रजतत्वनिष्ठप्रकारतैव भवतीति नातिव्याप्तिः । अत्र समूहालम्बनं नाम नानाविशेषणविशेष्यकज्ञानरूपं बोध्यम् ।

इदानीन्तावद् दर्शनेष्वाचार्यैः स्वातन्त्र्येण कति प्रमा स्वीक्रियत इत्यत्र विचार्यते- तथा च प्रत्यक्षमेकमेव प्रमेति चार्वाकाः, प्रत्यक्षानुमितिभेदेन प्रमायाः द्वैविध्यमिति बौद्धाः वैशेषिकाश्च, प्रत्यक्षानुमित्युपमितिभेदेन प्रमात्रयमिति नैयायिकैकदेशिनः, प्रत्यक्षानुमित्युपमितिशाब्दभेदेन प्रमाचतुष्टयमिति नैयायिकाः, प्रत्यक्षानुमित्युपमितिशाब्दार्थापत्तिभेदेन प्रमायाः पञ्चत्वमिति प्राभाकराः, अनुपलब्धिमप्यादाय प्रमायाः षड्विधत्वमिति भाट्टवेदान्तिनौ, सम्भवैतिह्यावपि संगृह्याष्टौ प्रमेति पौराणिकाः, चैष्टिकमप्यादाय प्रमाया नवविधत्वमिति तान्त्रिका इत्यपि स्मर्तव्यम् । सम्प्रति प्रमास्वरूपविवेचनानन्तरं प्रमाभेदाः प्रदर्श्यन्ते-

### ६.१ प्रमाभेदाः

न्यायदर्शने प्रत्यक्षानुमित्युपमितिशाब्दभेदेन प्रमायाश्चतुष्ट्वं स्वीक्रियते चेद् वैशेषिकदर्शने प्रत्यक्षानुमितिभेदेन प्रमाद्वयं स्वीक्रियते । एवञ्चेदानीं न्यायोक्तप्रमाचतुष्टयस्य वैशेषिकोक्तप्रमाद्वयस्य च विवेचनमधस्तात् प्रस्तूयते-

### ६.१.१ प्रत्यक्षम् (ज्ञानम्)

प्रत्यक्षप्रमाणजन्यं ज्ञानं हि प्रत्यक्षम् । तच्चेन्द्रियस्यार्थस्य च सन्निकर्षेणोत्पद्यमानं ज्ञानमेवेति । इन्द्रियञ्च चक्षुरादिकम् । अर्थो घटादिः । तयोः सन्निकर्षो नाम संयोगादिसम्बन्धः । तादृशसन्निकर्षजन्यं यज्ज्ञानं तत्प्रत्यक्षमिति । प्रत्यक्षशब्दस्य प्रमाप्रमाणयोश्चोभयार्थे प्रयोगो भवति । तन्नाम प्रत्यक्षप्रमायाः करणमपि प्रत्यक्षप्रमाणं भवति । गौतमेन "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" (न्यायसूत्रम्, १।१।४) इत्युक्तम् । सूत्रार्थस्तु इन्द्रियस्यार्थस्य च सन्निकर्षेणोत्पन्नं यदव्यपदेश्यम्=शाब्दबोधभिन्नम्, अव्यभिचारि=भ्रमभिन्नम्, व्यवसायात्मकम्=निश्चयात्मकं संशयभिन्नं वा यज्ज्ञानं तत् प्रत्यक्षमिति ।

सूत्रमिदमर्थापयन् वात्स्यायन "इन्द्रियस्यार्थेन सन्निकर्षादुत्पद्यते यज्ज्ञानं तत्प्रत्यक्षम्" (वात्स्यायनः, सन् १९९८, २०) इति वदति । प्रत्यक्षमिति पदन्तु अव्ययीभावसमासात् सिद्ध्यति । प्रत्यक्षशब्दस्य

व्युत्पत्तिं कुर्वन् न्यायभाष्यकारो वदति यत्- "तच्च-अक्षस्य अक्षस्य प्रतिविषयं वृत्तिरिति । वृत्तिश्च सन्निकर्षो ज्ञानं वेति" (वात्स्यायनः, सन् १९९८, १७) । प्रशस्तपादस्त्वेवं वदति- "अविद्यापि चतुर्विधा । प्रत्यक्षलैङ्गिकस्मृत्यार्षलक्षणा । अक्षमक्षं प्रतीत्योत्पद्यत इति प्रत्यक्षम्" (देवाचार्यः, सन् २०१६, १५३) इति । एतन्मते विद्या चतुर्विधा । शङ्करमिश्रोऽपि विद्यायाः चातुर्विध्यमेवाङ्गीकरोति (मिश्रः, सन् १९६९, ४५०) । वैशेषिकराद्धान्ते विद्यायाश्चातुर्विध्यं स्वीक्रियते, परन्तु नैयायिकैस्तन्न स्वीक्रियते । अतः प्रत्यक्षलैङ्गिकभेदादिति द्वैविध्यमेव ।

न्यायवार्तिककारेण तु "इन्द्रियेणार्थस्य सन्निकर्षादुत्पद्यते यज्ज्ञानं तत्प्रत्यक्षम्" (उद्योतकरः, सन् १९९७, ३०) इत्युच्यते । अन्नम्भट्टेनापि इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमेव प्रत्यक्षमिति लक्षणं प्रस्तुतम् । इन्द्रियपदेन बाह्यज्ञानेन्द्रियातिरिक्तं मनसोऽपि ग्रहणं कर्तव्यम् । मानसप्रत्यक्षेऽपीन्द्रियपदेन मनस एव ग्रहणं भवति । सामान्यतो बाह्यप्रत्यक्षे त्रिविधः सन्निकर्षो भवति- आत्मनो मनसा सह सन्निकर्षः, मनसो ज्ञानेन्द्रियेण सह सन्निकर्षः, ज्ञानेन्द्रियस्य बाह्यपदार्थेन सह सन्निकर्षश्चेति । मानसप्रत्यक्षे तु द्विविधः सन्निकर्षो भवति- आत्मनो मनसा सह सन्निकर्षः, मनसः मनोभावेन सह सन्निकर्षश्चेति । ननु इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमिति व्यभिचरितम् । तथाहि सोपनेत्रचक्षुरिन्द्रियेण पदार्थस्य ग्रहणं कथम् ? यतश्चक्षुरिन्द्रियस्य साक्षात्पदार्थेन सह संयोगाभावादिति प्रश्ने यदि स्वच्छद्रव्यं विद्यते चेत्तस्य तेजसो निरोधकत्वाभावात्तदन्तः चक्षुरिन्द्रियस्य प्रवेशसम्भवात् चक्षुरिन्द्रियेण सहजतयैव प्रत्यक्षसम्भवाच्च न कोऽपि दोषः । कणादमते इन्द्रियार्थसन्निकर्षः इन्द्रियञ्च प्रत्यक्षप्रमाणपदवाच्यम् । इन्द्रियार्थसन्निकर्षजन्यत्वे सति ज्ञानत्वं प्रत्यक्षस्य लक्षणम् । लक्षणेऽस्मिन् ज्ञानत्वमात्रोक्तौ अनुमित्यादावतिव्याप्तिः । ज्ञानत्वपदाभावे ध्वंसं प्रति प्रतियोगिनः कारणत्वेन इन्द्रियार्थसन्निकर्षध्वंसेऽपि इन्द्रियार्थसन्निकर्षजन्यत्वस्य सत्वात्तत्रातिव्याप्तिः । अतस्तद्वारणाय विशेष्यविशेषणपदं देयम् ।

किञ्च जीवात्मा परमात्मभिन्न इत्यात्मविषयकानुमितौ प्रकृतज्ञानविषयत्वस्याप्यात्मनि विद्यमानत्वेन पुनरपि तत्रैवात्मन्यतिव्याप्तिरिति चेन्न, तत्र तावद् इन्द्रियार्थसन्निकर्षत्वावच्छिन्नजनकता-निरूपितजन्यतावच्छेदकीभूत-ज्ञानत्वभिन्नजातिमत्त्वस्य लक्षणत्वस्वीकारादिति । इदानीमिन्द्रियार्थ-सन्निकर्षपदेन आत्ममनस्संयोगस्य ग्रहणेऽपि तज्जन्यतावच्छेदकीभूतजातिः ज्ञानत्वभिन्ना न, नापीन्द्रियार्थसन्नि-कर्षजन्यतावच्छेदिकेत्यतो न तत्रातिव्याप्तिः । ईश्वरप्रत्यक्षस्य खलु नित्यतया जन्यत्वाभावेन तत्राव्याप्तिरिति चेन्न, तत्र जन्यप्रत्यक्षस्यैव खलु लक्षणं कृतन्न तु ईश्वरप्रत्यक्षस्येति । अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षमिति स्वीकारे ईश्वरप्रत्यक्षे नाव्याप्तिः । अनुमितौ व्याप्तिज्ञानस्य, उपमितौ सादृश्यज्ञानस्य, शाब्दबोधे पदज्ञानस्य, स्मृतौ अनुभवस्य कारणत्वात्तत्र तत्र नातिव्याप्तिः । इदं लक्षणं हीश्वरप्रत्यक्षसाधारणम् ।

प्रत्यक्षं द्विविधं निर्विकल्पकसविकल्पकभेदात् । तदुक्तञ्च "तद् द्विविधं सविकल्पकं निर्विकल्पकञ्च । तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम् । यथेदं किञ्चित् । सप्रकारकं ज्ञानं सविकल्पकम् । यथा डित्थोऽयम्, ब्राह्मणोऽयम्, श्यामोऽयमिति" (भट्टः, सन् २०१७, १५७) इति । वैशेषिका अपि प्रत्यक्षस्य द्वैविध्यं

स्वीकुर्वन्ति । यथोक्तं वैशेषिकसूत्रोपस्कारे- "असर्वज्ञीयञ्च प्रत्यक्षं द्विविधम्- सविकल्पकं निर्विकल्पकञ्च" (मिश्रः, सन् १९६९, ४५१) इति ।

अत्रेदं बोध्यम्- प्रकारत्वानिरूपकत्वे सति ज्ञानत्वं निर्विकल्पकस्य लक्षणम् । 'इदं किञ्चिदि'ति ज्ञाने विशेषणरहितं ज्ञानं जायतेऽतो निर्विकल्पकम् । वस्तुतो नामजात्यादिरहितं विशेष्यज्ञानं विना 'इदं किञ्चिदि' त्याकारकं ज्ञानं भवति चेत्तद् निर्विकल्पकमिति । प्रकारतानिरूपकत्वे सति ज्ञानत्वं सविकल्पकस्य लक्षणम् । यथा श्यामोऽयम्, घटोऽयम् इति । घटोऽयमित्यत्र घटत्वविशिष्टघटस्य ज्ञानेनेदं सविकल्पकमिति ज्ञेयम् । अत्र हि घटं दृष्ट्वा घटत्वप्रकारकघटविशेष्यकज्ञानं भवति, अतः सविकल्पकम् । 'श्यामोऽयम्' इत्यत्र श्यामत्वविशिष्टश्यामस्य ज्ञानेन सविकल्पकमिति । अत्र श्यामत्वप्रकारकश्यामविशेष्यकज्ञानं भवति, अतः सविकल्पकमिति ।

एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकं भवतीति नियमेन पदार्थस्वरूपज्ञानं यदा, तदनन्तरं नामजात्यादिस्मरणमपि तस्य भवति । इदं ज्ञानमपि सविशेषमेव भवति । सविकल्पकज्ञाने वस्तु सविशेषं सदेव भासते, अर्थाद् विशेष्यविशेषणभावसम्बन्धसहितमेव ज्ञानमुत्पद्यते । सर्वत्रापि प्रत्यक्षप्रमाणविषये ज्ञातुः सर्वप्रथमं बाह्येन्द्रियेण निश्चयरूपं ज्ञानं जायते । अन्तःकरणेन निश्चयात्मकज्ञानानन्तरमनुव्यवसायात्मकं ज्ञानं जायते । यस्य बाह्येन्द्रियं नष्टं तस्यानुव्यवसायात्मकं ज्ञानं न सम्भवति, अर्थादन्धस्य बधिरस्य वा न कदाप्यनुव्यवसायात्मकज्ञानं भवति । अतस्तत्पूर्वं व्यवसायात्मकज्ञानस्योत्पादने चक्षुरादिबाह्येन्द्रियाणां खलु अपेक्षा भवति ।

इदमत्र गाढं चिन्तनीयम्- निष्प्रकारकं ज्ञानं निर्विकल्पकमित्यत्र विशेषणमेव प्रकार इति । तथा च प्रकारताशून्यं ज्ञानं निर्विकल्पकमिति पूर्वमुक्तम् । यस्मिन् ज्ञाने न किमपि विशेषणं भवति, तदेव निर्विकल्पकमिति । सर्वमपि ज्ञानं सदा सविषयकमेव भवति । नहि कदापि ज्ञानं निर्विषयकं भवति । अत एव ज्ञानं सर्वदापि विषयि भवति । तादृशज्ञाने भासमानपदार्था विषया भवन्ति । यथा 'अयं घटः' इत्यादिज्ञाने भासमानो घटादिः विषय उच्यते । तादृशघटादिनिष्ठविषयता त्रिविधा भवति- प्रकारताख्यविषयता, विशेष्यताख्यविषयता, संसर्गताख्यविषयता चेति । तत्र चोदाहरणम्- 'अयं घटः' इत्याकारकज्ञाने घटो विषयः, ज्ञानं च विषयि भवति । एवमेव घटो विशेष्यः, घटत्वन्तु विशेषणं प्रकारो वेति । अत एव घटत्वप्रकारकघटविशेष्यकं ज्ञानं तत्र जायते । त्रिसृषु विषयतासु प्रकारीभूते घटत्वे प्रकारताख्यविषयता वर्तते । विशेष्यीभूते घटे तु विशेष्यताख्यविषयता विद्यते । घटत्वं हि घटे तिष्ठति । तत्र च कश्चन सम्बन्धो वक्तव्यः । स सम्बन्धस्तु न संयोगः, कुतः ? द्रव्ययोरेव संयोग इति नियमात् । जातिव्यक्त्योः समवाय इति नियमेन घटघटत्वयोः सम्बन्धः समवायो वक्तव्यः, नान्यः ।

एवञ्च घटघटत्वयोः समवायसंसर्गे प्राप्ते संसर्गताख्यविषयता तत्र वर्तते । तथा च विशेष्यतानिरूपकं ज्ञानम्, प्रकारतानिरूपकं ज्ञानं सविकल्पकमित्यादिलक्षणमपि कर्तुं शक्यते । 'अयं घटः' इत्याकारकज्ञानमेव न स्याच्चेत्तर्हि ज्ञानं विषयि न भवेत् । घटोऽपि विषयो न कस्यापि भवेदित्यपि ज्ञातव्यम् । निर्विकल्पकज्ञानस्य नामजातिसंज्ञेत्यादियोजनारहितत्वात् तत्र त्रिसृषु विषयतासु मध्ये न कापि विषयता वक्तुं शक्यतेऽतस्तत्र

निर्विकल्पके चतुर्थी विषयतेति कल्प्यते। एवंरीत्या न्यायवैशेषिकदर्शनाभिमतप्रत्यक्षप्रमा, तद्भेदाश्च प्रतिपादिताः।

## ६.१.२ अनुमितिः

इदानीं प्रत्यक्षप्रमाविचारानन्तरमनुमितिप्रमा विचार्यते । किन्नामानुमितिः ? इत्यत्रोच्यते- "परामर्शजन्यं ज्ञानमनुमितिः" (भट्टः, सन् २०१७, १७४) इति । परामर्शजन्यं यज्ज्ञानं सैवानुमितिः । यथा महानसादौ किल वह्नेः धूमस्य च सर्वथा साहचर्यं दृष्ट्वा कदाचित् कुत्रचन पर्वते एकस्य धूमस्य (व्याप्यस्य) दर्शनेनान्यस्य वह्नेः (व्यापकस्य) यज्ज्ञानं जायते, तादृशज्ञानमेवानुमितिरिति। अनुमितित्वन्नाम परामर्शजन्यत्वे सति ज्ञानत्वमिति । 'पर्वतो बह्निमान्' इत्याकारकानुमितौ 'वह्निव्याप्यधूमवान् पर्वतः' इत्याकारकपरामर्शजन्यत्वस्याथ च ज्ञानत्वस्यापि सत्वाल्लक्षणसमन्वयः । अत्र ज्ञानत्वमात्रोक्तौ प्रत्यक्षादिज्ञानेऽतिव्याप्तिः । परामर्शजन्यत्वमात्रोक्तौ परामर्शध्वंसेऽतिव्याप्तिः । परामर्शजन्यत्वं यथानुमितिः, तद्वत् परामर्शध्वंसोऽपि । यतो हि परामर्शस्यैवाभावे कस्य ध्वंसो भवेत् ? ध्वंसं प्रति प्रतियोगिनः कारणत्वनियमात् । तस्मात् परामर्शध्वंसस्यापि परामर्शजन्यत्वादतिव्याप्तिः । तद्वारणाय ज्ञानत्वमित्यपि पदं देयम् । तथा सति नातिव्याप्तिः । कुतः ? परामर्शध्वंसस्य परामर्शजन्यत्वेऽपि ज्ञानत्वाभावादिति । अत्र प्रश्नः - परामर्शविषयकानुव्यवसाये परामर्शजन्यत्वस्य ज्ञानत्वस्य च विद्यमानत्वादतिव्याप्तिः । तत्र ज्ञानविषयकं ज्ञानमनुव्यवसाय इत्युच्यते । मानसप्रत्यक्षात्मकः खलु अनुव्यवसायः । 'अयं पटः' इत्याकारकप्रत्यक्षानन्तरं 'अयं पटः इत्याकारकज्ञानवान् अहम्' इत्याकारकोऽनुव्यवसायः समुत्पद्यते । अनुव्यवसायं प्रति व्यवसायज्ञानस्य कारणत्वात् 'वह्निव्याप्यधूमवान् पर्वतः' इत्याकारकपरामर्शानन्तरं जायमाने 'वह्निव्याप्यधूमवान् पर्वत इत्याकारकज्ञानवान् अहम्' इत्यनुव्यवसाये परामर्शजन्यत्वस्य विद्यमानत्वेनातिव्याप्तिः । तद्वारणायानुमितिलक्षणे हेत्वविषयकत्वे सतीति पदं निवेश्यम् । तथा च लक्षणं भवति- हेत्वविषयकत्वे सति परामर्शजन्यत्वे सति ज्ञानत्वमनुमितेर्लक्षणमिति । परामर्शः किल हेतुविषयकः । अतः परामर्शानुव्यवसायोऽपि हेतुविषयकः । तथा च परामर्शानुव्यवसाये हेतुविषयकत्वस्यैव सत्त्वाद् हेत्वविषयकत्वाभावान्नातिव्याप्तिः। ननु परामर्शो नाम कः ? उच्यते, "व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः" (भट्टः, सन् २०१७ : १७५) इति। किञ्च-

"व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते" (भट्टाचार्यः, सन् २००३, कारिका-६८)।

अस्यार्थस्तु- व्याप्तिनिष्ठप्रकारतानिरूपकत्वे सति पक्षसम्बन्धविषयकत्वे सति ज्ञानत्वं परामर्शस्य लक्षणम् । 'वह्निव्याप्यधूमवान् पर्वतः' इत्याकारकपरामर्शज्ञाने व्याप्तिः (धूमः) विशेषणं वर्तते । तथा च व्याप्तिनिष्ठप्रकारतानिरूपकत्वं ज्ञानस्येति । यत्र विशेषणविशेष्यावगाहिज्ञानं तत्र तयोः संसर्गो किल नियमेन भासते । एवञ्च धूमस्य पर्वतांशे विशेषणत्वेन धूमपर्वतयोः संसर्गस्य संयोगस्यापि विषयत्वात् पक्षसम्बन्धविषयकत्वज्ञानत्वमपि परामर्शे विद्यत इति लक्षणसमन्वयः ।

अनुमित्युत्पत्तिक्रमस्तु एवम्- प्रथमन्तावद् महानसादौ धूमं वह्निं च पश्यन् तयोः खलु साहचर्यं गृहीत्वा पुनस्तयोर्भूयोदर्शनेन व्यभिचाराभावं च गृहीत्वा 'यत्र यत्र धूमस्तत्र तत्र वह्नि'रिति धूमे वह्निनिरूपितां

व्याप्तिं गृह्णाति । तदनन्तरं कदाचित् पर्वतसमीपं गच्छति । तत्र पर्वते धूमं पश्यतः पुरुषस्य 'पर्वतो धूमवान्' इति पक्षधर्मताज्ञानमुत्पद्यते । तदनन्तरं पूर्वोत्पन्नव्याप्त्यनुभवजन्यसंस्कारोद्बोधात् व्याप्तेः स्मरणं भवति । एतादृशपक्षधर्मताज्ञानव्याप्तिस्मरणाभ्यां हि 'वह्निव्याप्यधूमवान् अयं पर्वतः' इति परामर्शो जायते । ततः 'पर्वतो वह्निमान्' इत्यनुमितिः । इत्येवं व्याप्तिस्मृतिपरामर्शानुमितीनां किलोत्पत्तिक्रमः । अनुमितिः प्रमात्मिका । एतादृशानुमितेः करणमनुमानं भवति । परामर्शो व्यापारः । परामर्शः खलु कथं व्यापार ? इत्यत्रोच्यते - व्याप्तिस्मरणानन्तरं परामर्शोत्पत्तिः । तदनन्तरमनुमितिः । तथा च व्याप्तिस्मरणजन्यत्वे सति व्याप्तिस्मरणजन्यानुमितिजनकत्वरूपव्यापारत्वं परामर्शे वर्तत इति तस्य व्यापारत्वं सिद्ध्यति ।

प्राच्यास्तावदनुमितौ परामर्शो व्यापारो भवति । व्याप्तिज्ञानं करणं भवति । अनुमितौ व्याप्यलिंग-विषयकज्ञानं करणम् । व्याप्यत्वेन ज्ञायमानं लिङ्गमनुमितौ करणमिति स्वीकुर्वन्ति । तन्न युक्तमिति नव्याः । तथा सति अनागतेन, विनष्टेन च लिङ्गेनानुमितिर्न स्यात् । यथोक्तं विश्वनाथेन कारिकायाम् -

अनुमायां ज्ञायमानं लिङ्गं तु करणं न हि ।
अनागतादिलिङ्गेन न स्यादनुमितिस्तदा ॥ (भट्टाचार्यः, सन् २००३, कारिका-६७)

इदमत्र बोध्यम्- 'इयं यज्ञशाला अतीतवह्निमती अतीतधूमात्', 'अयं महानसः भविष्यद्वह्निमान् भविष्यद्धूमात्' इत्यत्राप्यनुमितेः दर्शनात् । ज्ञायमानन्नाम वर्तमानकालीनज्ञानविषयीभूतम् । एतादृशस्थले तादृशं वर्तमानं लिङ्गं न विद्यत इति कारणाभावेऽपि कार्यभावाद् व्यतिरेकव्यभिचारः । व्याप्यत्वेन ज्ञायमानस्य लिङ्गस्य (धूमस्य) तदानीमभावादनुमितेरभावः । दृश्यते चैतादृशस्थलेऽनुमितिः । अतः ज्ञायमानं लिङ्गन्न करणमपितु लिङ्गज्ञानं करणमिति बोध्यम् । लिङ्गज्ञानस्य करणत्वे त्वनागतादिलिङ्गकानुमितिरुत्पद्यते । लिङ्गाभावेऽपि लिङ्गविषयकस्मरणसत्वादिति । वैशेषिके लिङ्गस्यैवानुमितिकरणत्वं स्वीक्रियते । तद्यथा वैशेषिकसूत्रोपस्कारे-

अनुमेयेन सम्बद्धं प्रसिद्धञ्च तदन्विते
तदभावे तु नास्त्येव तल्लिङ्गमनुमापकम् ॥

एतेन लिङ्गमेवानुमितिकरणं न तु तस्य परामर्शः, तस्य निर्व्यापारत्वेनाकरणत्वात् । लिङ्गस्य तु स एव व्यापारः (मिश्रः, सन् १९६९, ४८७) इति ।

अनुमितिरपि द्वेधा विभज्यते । स्वार्थपरार्थानुमितिभेदादिति । येन स्वार्थानुमानेन स्वप्रयोजनसिद्धिः भवति, सा स्वार्थानुमितिः । येन परार्थानुमानेन परप्रयोजनसिद्धिः भवति, सा परार्थानुमितिः । न्याय इव वैशेषिकेऽप्यनुमानस्य द्वैविध्यं स्वीक्रियते । यथोक्तं शङ्करमिश्रेण वैशेषिकसूत्रोपस्कारे तच्चानुमानं द्विविधम्- "स्वार्थं परार्थञ्च । तत्र स्वार्थं स्वयमेव व्याप्तिपक्षधर्मतयोरनुसन्धानात् । परार्थञ्च परोदीरितन्याय-जन्यव्याप्तिपक्षधर्मताज्ञानम्" (मिश्रः, सन्१९६९, ४९३) इति। एतेनानुमानस्य द्वैविध्यादनुमितेरपि स्वार्थानुमिति-परार्थानुमितिभेदेन द्वैविध्यं नितरामेव सिद्ध्यति । एवंरीत्या न्यायवैशेषिकदर्शनाभिमतानुमितिप्रमा विवेचितेति दिक् ।

### ६.१.३ उपमितिः

इदानीमनुमितिज्ञानस्य निरूपणानन्तरमुपमितिज्ञानं निरूप्यते । उपमितिस्तु संज्ञासंज्ञिसम्बन्धज्ञानरूपा । संज्ञा नाम वाचकः शब्दः । संज्ञी वाच्यार्थः । तयोः "संज्ञासंज्ञिनोः सम्बन्धो वाच्यवाचकभावरूपः । तस्य ज्ञानम् । तथा च पदवाच्यत्वप्रकारकज्ञानविशेषः उपमितिशब्दवाच्य इति भावः । एतेन पदपदार्थसम्बन्धविषयकत्वे सति ज्ञानत्वमुपमितेः लक्षणमिति स्पष्टीभवति । अयं गवयपदवाच्य इत्युपमितौ पदपदार्थसम्बन्धरूपवाच्यत्वविषयकत्वस्य ज्ञानत्वस्य च सत्वाल्लक्षणसमन्वयः । संज्ञा नाम पदम्, संज्ञी नाम तस्य पदस्यार्थः, तयोः पदपदार्थयोः सम्बन्धो नाम शक्तिरिति । एवञ्च पदपदार्थयोः सम्बन्धज्ञानमेवोपमितिरित्यर्थो लभ्यते । तदुक्तञ्च संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः । तत्करणं सादृश्यज्ञानम् । अतिदेशवाक्यार्थस्मरणं व्यापारः" (भट्टः, सन् २०१७, २३३) इति । गवयादिपदानां गोसादृश्यारण्यकपशौ 'गवयो गवयपदवाच्यः' इति ज्ञानमुपमितिः, सैव फलमुच्यते । गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थस्मरणं व्यापारो भवति । गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थज्ञानमुपमानमिति । विश्वनाथस्त्वेवमाह -

ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम् ।
सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम् ॥
वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते ।
गवयादिपदानान्तु शक्तिधीरूपमा फलम् ॥ (भट्टाचार्यः, सन् २००३, कारिका ७९-८०)

प्रथमतो गवयादिकं पश्यतः खलु ग्रामीणस्य पुरुषस्य गवादीनां या सादृश्यधीः 'अयं गोसदृशः' इत्याकारकं गवयादिविशेष्यकं गोसादृश्यप्रकारकप्रत्यक्षं स्यात्, तादृशधीरूपमितिकरणं भवतीत्यर्थः । यथा गवयपदार्थमजानन् कश्चिज्जनः आरण्यकपुरुषात् 'गोसदृशो गवयः' इति श्रुत्वा कदाचित् अरण्यं गच्छति । तत्र गोसदृशमेव पिण्डं दृष्ट्वाप्तोक्तवाक्यं स्मरति, ततः 'अयं गवयपदवाच्यः' इत्याकारकमुपमितिज्ञानं तस्य पुरुषस्य जायते । तादृशं ज्ञानमतिदेशवाक्यार्थज्ञानात्मकेनोपमानप्रमाणेनोत्पद्यते । उपमानन्नाम उपमितिनिरूपितकरणत्वम् । तथा च उपमितित्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वे सति, उपमितिजनकव्यापारजनकत्वमित्यर्थः ।

उपमितित्वावच्छिन्ना कार्यता हि 'गवयो गवयपदवाच्यः' इत्याकारकगवयत्वावच्छिन्नविशेष्यक गवयपदवाच्यत्वप्रकारकोपमितौ विद्यमाना, तादृशकार्यतानिरूपितकारणता च 'गोसदृशो गवयपदवाच्यः' इत्याकारकगोसदृशत्वावच्छिन्नविशेष्यक-गवयपदवाच्यत्वप्रकारकज्ञानात्मकोपमाननिष्ठा, तदाश्रयत्वस्य 'गोसदृशो गवयपदवाच्यः' इत्याकारकातिदेशवाक्यार्थविषयकस्मरणरूपव्यापारजनकत्वस्य च 'गोसदृशो गवयपदवाच्यः' इत्याकारकातिदेशवाक्यार्थज्ञानरूपोपमाने विद्यमानत्वाल्लक्षणसमन्वयः ।

### वैशेषिकरीत्योपमितेः पृथक्प्रमात्वाभावोपपादनम्-

वैशेषिकैः उपमानप्रमाणस्य पृथक्तया प्रमाणत्वास्वीकृतत्वादेवोपमितिप्रमाया अपि विवेचनावसरो न दृश्यते । एतन्मते उपमानप्रमाणस्य शब्देऽन्तर्भाव इति । शब्दस्तु पुनः अनुमानमेव । तदुक्तञ्च

प्रशस्तपादभाष्ये यत् “आप्तेनाप्रसिद्धस्य गवयस्य गवा गवयप्रतिपादनादुपमानमाप्तवचनमेव” (देवाचार्यः, सन् २०१६, १७८) इति । तथा हि ‘गोसदृशो गवयः’ इत्यत्र शब्दश्रवणस्यावश्यकत्वादर्थाद् गोसादृश्येन गवा गवयस्य निरूपितत्वाद् यथा गौस्तथा गवय इत्याकारकातिदेशवाक्यस्यापि आप्तत्वादेवोपमानस्य शब्देऽन्तर्भावः । शब्दप्रमाणन्तावदनुमानमेवेति प्रतिपादनादुपमानमपि अनुमानान्तर्गतमेवेति सिद्धयति । एवमेव वैशेषिकसूत्रोपस्कारेऽप्युक्तं विद्यते यत् “तत्रोपमानं तावदनुमानमेव शब्दद्वारा। ......यद्वा गवयशब्दो गवयवाचकः, असति वृत्त्यन्तरे शिष्टैस्तत्र प्रयुज्यमानत्वात्, असति वृत्त्यन्तरे यः शब्दो यत्र शिष्टैः प्रयुज्यते, स तस्य वाचको यथा सहकारी वाच्यः । स वरमनुमाने क्लृप्तप्रमाणभावेऽस्तु किं कल्पनीयप्रमाणभावेनोपमानेनेति” (मिश्रः, सन् १९६९, ५०७-५०८) । एतेनोपमानस्य पृथक्प्रमाणाभावादुपमितेरपि पृथक्तया प्रमात्वाभावः सिद्धयति । तथा चोपमितिज्ञानस्यानुमितिज्ञानेऽन्तर्भाव इत्यवगम्यते । एवंरीत्या न्यायवैशेषिकदर्शनाभिमतोपमितिप्रमा विवेचितेति दिक् ।

**६.१.४ शाब्दः**

उपमितिज्ञानस्य निरूपणानन्तरमिदानीं शाब्दप्रमा निरूप्यते । प्रमास्वन्तिमप्रमेयं शाब्दप्रमा । शब्दाज्जायमानं ज्ञानं शाब्दमिति, अर्थात् शब्दप्रमाणेनोत्पन्नं ज्ञानं शाब्दो भवतीति । यद्वा यथार्थवक्त्रा प्रयुक्तशब्दानां श्रवणानन्तरं जायमानं ज्ञानं शाब्दप्रमेति निष्कर्षः । शब्दो नाम कः ? इति प्रश्ने, उच्यते न्यायसूत्रे-“आप्तोपदेशः शब्दः” (न्यायसूत्रम्, १।१।७) इति । एतेनाप्तप्रयुक्तत्वे सति वाक्यत्वं शब्दप्रमाणस्य लक्षणं स्पष्टीभवति । वाक्यत्वं शब्दप्रमाणस्य लक्षणमित्येतावन्मात्रोक्तौ अनाप्तोच्चरितवाक्येऽतिव्याप्तिः । अतस्तद्वारणाय आप्तप्रयुक्तत्वे सतीति विशेषणपदं निवेश्यम् । आप्तप्रयुक्तत्वं शब्दप्रमाणस्य लक्षणमित्येवोच्यते चेत्तर्हि ‘अइउण्’ इत्यादावतिव्याप्तिः । तन्निवारणाय वाक्यत्वमिति विशेष्यपदमपि निवेशनीयम् । ‘अइउण्’ इत्यादीनामाप्तप्रयुक्तत्वेऽपि वाक्यत्वाभावान्नातिव्याप्तिः ।

अत्रेदं चिन्तनीयम्- आप्तोक्तवाक्यस्यैव प्रमाणत्वं न त्वनाप्तोक्तवाक्यस्येति । आप्तस्तावद् यथार्थवक्तैव । तदुपदेश एव शब्दः । वाक्यं पुनः पदसमूहात्मकम् । यथा ‘गामानय’ इत्यादि । शाब्दप्रमायां पदविषयकं ज्ञानं करणम्, पदजन्यपदार्थस्मरणं व्यापारः, शाब्दबोधः (वाक्यार्थबोधः) फलम्, शक्तिज्ञानञ्च सहकारिकारणं भवतीति ज्ञेयम् । तदुक्तम्-

“पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः । शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥” (भट्टाचार्यः, सन् २००३, कारिका-८१) पदसमूहात्मकवाक्यजन्यो यो वाक्यार्थबोधः, सा प्रमोच्यते । शब्दस्य दृष्टादृष्टभेदेन द्वैविध्यमित्यपि बोध्यम् ।

**वैशेषिकरीत्या शाब्दस्य पृथक्प्रमात्वाभावोपपादनम्-**

वैशेषिकैः शब्दप्रमाणस्य पृथक्तया प्रमाणत्वं न स्वीक्रियतेऽतः शाब्दप्रमाया अपि नास्ति प्रतिपादनावसरः । एतन्मते शब्दप्रमाणस्यानुमानेऽन्तर्भावादेव शाब्दज्ञानस्याप्यनुमितिज्ञानेऽन्तर्भाव इति ज्ञेयम् । शब्दोऽनुमानमेव (शाब्दबोधोऽनुमितिरेवेति वा) वदन् कणादः सूत्रं प्रस्तौति यत्- “एतेन शाब्दं व्याख्यातम्”

(वैशेषिकसूत्रम्, ९-२-३) इति । अस्यार्थः- एतेन=अनुमानप्रमाणेन, शाब्दम्=शब्दाज्जायमानं ज्ञानमुत शब्दकरणकं ज्ञानम्, व्याख्यातमिति । किञ्च 'घटं पश्यामि' इत्यादिवाक्यघटकशब्दाः, परस्परान्वितार्थबोधकाः, साकाङ्क्षशब्दत्वात्, गामानयेति वाक्यघटकशब्दवदित्यनुमानेन शब्दोऽनुमानमेवेति सिद्ध्यति । शङ्करमिश्रोऽपि एतादृशमेव भावं प्रकटयति यत् "एते पदार्थाः मिथः संसर्गवन्तः आकाङ्क्षादिमद्भिः स्मारितत्वात् गामभ्याजेति पदार्थसार्थवत्" (मिश्रः, सन् १९६९, ४९६) इत्यनुमानेन शब्दस्यानुमानेऽन्तर्भाव इति तु स्पष्टमेव ।

प्रशस्तपादभाष्ये "शब्दादीनामप्यनुमानेऽन्तर्भावः समानविधित्वात् । यथा प्रसिद्धसमयस्यासन्दिग्ध-लिङ्गदर्शनप्रसिद्ध्यनुस्मरणाभ्यामतीन्द्रियेऽर्थे भवत्यनुमानमेवं शब्दादिभ्योऽपीति" (देवाचार्यः, सन् २०१६, १७३) एवंरीत्या शब्दस्यानुमानत्वं प्रतिपादयति ग्रन्थकारः । अस्यार्थस्तु यथा व्याप्तिज्ञानवतः पुरुषस्यासन्दिग्धहेतु-दर्शनव्याप्तिस्मरणाभ्यामप्रत्यक्षेऽर्थे भवत्यनुमानम्, तद्वत् शब्दादिनाप्यनुमानं सम्भवतीति । एतेन शब्दस्य पृथक्प्रमाणत्वाभावात् शाब्दप्रमाया अपि पृथक्तया प्रमात्वाभावः सिद्ध्यति । तथा च शाब्द-ज्ञानस्यानुमितिज्ञानेऽन्तर्भाव इत्यवगम्यते । अत्र हि शब्दप्रमाणस्य द्वैविध्यात् शाब्दप्रमाया अपि द्वैविध्यमित्यपि न विस्मर्तव्यम् । एवंरीत्या न्यायवैशेषिकदर्शनाभिमतशाब्दप्रमा विवेचितेति दिक् ।

## ७. निष्कर्षः

पौरस्त्यदर्शनचिन्तनजगति बहुविधानि दर्शनानि विद्यन्ते । तन्मध्ये गौतमीयं न्यायदर्शनं प्रमाणविचारप्रधानमिति तु जानन्ति तत्त्वविदः । जगति विद्यमानानां पदार्थानां खलु सिद्धिः प्रमाणेनैव भवति । प्रमाणजन्यं ज्ञानं प्रमेति । तत्र ज्ञानं द्विविधं स्मृत्यनुभवभेदेन । अनुभवोऽपि यथार्थायथार्थभेदेन द्विविधः । प्रमा तावत् तद्वति तत्प्रकारकानुभवः, अर्थात् रजतं दृष्ट्वा इदं रजतमिति ज्ञाने रजतत्वप्रकारकरजतविशेष्यकत्वस्य विद्यमानत्वादिदं ज्ञानं प्रमेति निष्कर्षः प्रदत्तो वर्ततेऽत्रालेखे । एवञ्च तद्वन्निष्ठविशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वे सत्यनुभवत्वं यथार्थानुभवस्य लक्षणमिति निकृष्टलक्षणत्वेन निष्कर्षः प्रस्तुतो विद्यते । किञ्च प्रमाभेदनिरूपणायाप्ययं प्रयासो विहितः । आलेखेऽस्मिन् पुस्तकालयीयविधिमवलम्ब्य अनुसन्धानं कृतं वर्तते । तत्रापि विशेषतः संस्कृतमूलाकरग्रन्थाः प्रमुखसामग्रीत्वेन प्रयुक्ता वर्तन्ते । प्रथमं प्रमाभेदं प्रदर्श्य प्रत्यक्षानुमित्युपमितिशाब्दानां क्रमशो विवेचनं कृतमस्ति । वैशेषिकदर्शनदृष्ट्या प्रत्यक्षमनुमितिश्चेति प्रमाद्वयं विश्लेषितम् । प्रमायाः लक्षणप्रतिपादनावसरे प्रत्यक्षादिचतुर्विधप्रमाणां विश्लेषणावसरे च गौतमादारभ्य वात्स्यायन-उद्योतकर-वाचस्पति-उदयन-केशवमिश्र-विश्वनाथ-अन्नम्भट्टादिन्यायाचार्याणां कणादादारभ्य प्रशस्तपाद-शङ्करमिश्रयोश्च मतं प्रदर्श्य तद्गतं वस्तुतत्त्वं प्रकटीकृतं वर्तते ।

न्यायदर्शने वैशेषिकदर्शने च प्रतिपादितस्य प्रमास्वरूपस्याध्ययनेन प्रमाविषये कुत्रचित् साम्यं कुत्रचिच्च वैषम्यं दरीदृश्यते । तत्र प्रमायास्स्वरूपपतिपादने तु साम्यमेव दृश्यते । यतो हि उपलब्धिरेव प्रमा, उत यथार्थानुभवः प्रमा इत्यत्र उभयोः तात्त्विकभेदो न दृश्यते । प्रमायाः संख्याविषये तु वैषम्यं स्पष्टमेव दृश्यते । तत्र नैयायिकैः प्रत्यक्षानुमित्युपमितिशाब्दभेदेन प्रमायाश्चातुर्विध्यं स्वीक्रियते चेद् वैशेषिकैः प्रत्यक्षानुमितिभेदेन द्वैविध्यमेव स्वीक्रियत इति प्रमायास्संख्याविषये तयोः वैषम्यम् । प्रमाया लक्षणमनेकैराचार्यैः भिन्नभिन्नरूपेण

कृतन्तथापि सर्वेषामाचार्याणामाशयं गृहीत्वा तद्वन्निष्ठविशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वे सत्यनुभवत्वं प्रमात्वमिति निष्कर्षो दत्तो वर्तते ।

## कृतज्ञताज्ञापनम्

आलेखेऽस्मिन् न्यायवैशेषिकदर्शनदृष्टचा प्रमास्वरूपविश्लेषणक्रमे सैद्धान्तिकविषयवस्तुनिरूपणे अथ चानुसन्धानात्मकालेखगतप्रविध्यादिविषयेऽपि परामर्शदातृभ्यो विद्वद्भ्यो धन्यवादं ज्ञापयन् सूक्ष्मेक्षिकया चालेखमिदमाद्यन्तमालोडच सम्परीक्ष्य च यथावश्यकं खलु परामर्शदातृभ्यो विषयविज्ञेभ्यो गुरुभ्योऽपि हार्दिकीं कृतज्ञतां व्यनज्मि ।

## सन्दर्भग्रन्थसूची

आचार्यः, कणादः (सन् १९८७). *वैशेषिकदर्शनम्,* (व्याख्याता. नारायणमिश्रः), वाराणसी : चौखम्भासंस्कृतसंस्थानम् ।

आचार्यः, उदयनः (सन् १९८८). *न्यायकुसुमाञ्जलिः,* (हरिदासीटीकासहितः) वाराणसी : चौखम्बाविद्याभवनम् ।

आचार्यः, गौतमः (सन् १९७६). *न्यायदर्शनम्,* “वात्स्यायनभाष्यसहितम्” (सम्पादकः द्वारिकादासशास्त्री), वाराणसी : बौद्धभारतीप्रकाशनम् ।

उद्योतकरः, भारद्वाजः (सन् २००७). *न्यायवार्तिकम्,* (पुनर्मुद्रणम्), वाराणसी : चौखम्बासंस्कृतभवनम् ।

देवाचार्यः, प्रशस्तः (सन् २०१६). *प्रशस्तपादभाष्यम्,* (व्याख्याता. ढुण्ढिराजशास्त्री), वाराणसी : चौखम्भासंस्कृतसंस्थानम् ।

भट्टः, अन्नम् (सन् २००८). *तर्कसंग्रहः,* “आलोकव्याख्यासहितः” (व्याख्याता. के.एस्.वरदाचार्यः) महीशूरपुरी, कर्णाटकः : आर्षग्रन्थप्रकाशनम् ।

भट्टः, अन्नम् (सन् २०१७). *तर्कसंग्रहः,* “दीपिकान्यायबोधिनिपदकृत्यश्रीधरमुखोल्लासिनिव्याख्यासहितः” (सम्पादकः गोविन्दाचार्यः), वाराणसी : चौखम्बासुरभारतीप्रकाशनम् ।

भट्टः, जयन्तः (सन् १९८४). *न्यायमञ्जरी,* वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।

भट्टाचार्यः, विश्वनाथपञ्चाननः (सन् २००३). *न्यायसिद्धान्तमुक्तावली,* (किरणावलीसमाख्यव्याख्योपेता), (व्याख्याता. पं.कृष्णवल्लभाचार्यः), (षष्ठसंस्करणम्), वाराणसी : चौखम्बासंस्कृतसंस्थानम् ।

मिश्रः, केशवः (सन् २००३). *तर्कभाषा,* ‘आशुबोधिनिहिन्दीव्याख्योपेता’ (व्याख्याता. सुरेन्द्रदेवशास्त्री), वाराणसी : चौखम्बाविद्याभवनम् ।

मिश्रः, जगदीशचन्द्रः (सन् २०१९). *भारतीय दर्शन,* वाराणसी : चौखम्बासुरभारतीप्रकाशनम् ।

मिश्रः, वाचस्पतिः (सन् २०१३). *न्यायवार्तिकतात्पर्यटीका,* (तृतीयसंस्करणम्), वाराणसी : चौखम्बासंस्कृतभवनम् ।

मिश्रः, शंकरः (सन् १९६९). *वैशेषिकसूत्रोपस्कारः,* (व्याख्याता. ढुण्ढिराजशास्त्री) वाराणसी : चौखम्भासंस्कृतसंस्थानम् ।

शर्मा, राममूर्तिः (सन् १९९८). *न्यायवैशेषिक एक चिन्तन,* दिल्ली : राष्ट्रियसंस्कृतसंस्थानम् ।

शास्त्री, द्वारिकादासः (सम्पादकः). (सन् १९९८), *षड्दर्शनसूत्रसङ्ग्रहः,* वाराणसी : बौद्धभारती ।